दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-5 ■ वर्ष-4 ■ अङ्क-64 | 1 | जनवरी 3, 2025 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१, कलियुगाब्धः ५१२५ हेमन्तऋतुः सूर्यदक्षिणायनम् पौषमासः शुक्लपक्षः चतुर्थी तिथिः पौष 20 प्रविष्टांशः मङ्गलमयः भवेत्

2 हिमाचलप्रदेशस्य 'राज्यस्य बालकाः' ('चिल्ड्रन ऑफ द स्टेट') त्रयोदश-दिवसीय भ्रमणाय प्रस्थिताः



3 संस्कृतविद्या-स्थानानि--३८ शिक्षाग्रन्थानां वर्ण्यविषयाः-



5 नेपालस्य महत्त्वपूर्णेषु तीर्थस्थलेषु एकं पुण्यक्षेत्रमस्ति देवघाटः



## खेलरत्नपुरस्कारः- २०२५

## मनुभाकरः, डी. गुकेशः हॉकीक्रीडकः हरमन-प्रीतसिंहः, पैरा एथलीट-प्रवीणकुमारः च खेलरत्नपुरस्कारं प्राप्तवन्तः



हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः। भारतसर्वकारस्य क्रीडामन्त्रालयेन खेलरत्नपुरस्कारस्य घोषणा कृता। मनुभाकर, डी. गुकेशः हॉकीक्रीडकः हरमनप्रीतसिंहः, पैरा एथलीट प्रवीणकुमारः च खेलरत्नपुरस्कारं प्राप्तवन्तः। एतदतिरिक्तं ३२ द्वात्रिंशतेभ्यः क्रीडकेभ्यः अर्जुनपुरस्कारः प्रदत्तः भविष्यति। अवधेयं वर्तते यत् राष्ट्रपतिभवने जनवरीमासस्य सप्तदशदिनांके आयोजिते विशेषसमारोहे सर्वे पुरस्कृताः भारतस्य राष्ट्रपतितः पुरस्कारं प्राप्स्यन्ति।

## हिमाचलप्रदेशस्य दिव्याङ्गमहिलादलेन राष्ट्रीय विंशति-विंशतिः स्पर्धायां विजयं प्राप्य इतिहासं रचितम्



हिमसंसृकृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः । दिव्याङ्गपरिवर्तन फाउण्डेशन इत्यनया संस्थया झारखण्डस्य रामगढनगरस्य छावनी-फुटबॉलक्रीडाङ्गणे तृतीया दिव्याङ्ग-क्रिकेट- प्रतियोगिता आयोजिता। अस्यां प्रतियोगितायां हिमाचलप्रदेशस्य दिव्याङ्गमहिलादलेन राष्ट्रीय विंशति-विंशतिः स्पर्धायां विजयं प्राप्य इतिहासं रचितम्।

## ओपन् नेट्वर्क फ़ार् डिजिटल्-कामर्स इत्यनेन लघुव्यवसाय-क्षेत्रे, ई-वाणिज्यक्षेत्रे च क्रान्तिः विहिता- प्रधानमन्त्री



प्रधानमन्त्री अवदत् यत् ओपन् नेट्वर्क फ़ार् डिजिटल्-कामर्स ओ. एन्. डी. सी. इत्यनेन लघुव्यवसाय-क्षेत्रे, ई-वाणिज्यक्षेत्रे च क्रान्तिः विहिता। सामाजिक-सन्देशपटले श्रीमोदी अवदत् यत्, एतत् वृद्धिम् समृद्धिं च वर्धयितुं महत्त्वपूर्णां भूमिकां निभालयति । वाणिज्य-उद्योग-मन्त्रिणा पियूष गोयलेन निगदितं यत्, भारते ई-वाणिज्यस्य लोकतन्त्रि-करणस्य दृष्ट्या मोदी प्रशासनेन एकविंशत्यधिक-द्विसहस्र-तमे वर्षे ओ. एन्. डी. सी. इत्यस्य आरम्भः कृतः। सः अवदत् यत् विगतेषु त्रिषु वर्षेषु, तेन अनेकानि लक्ष्यानि संप्राप्तानि । अथ च अन्तर्जाल-मध्ये तेषां कृते समानं स्पर्धाक्षेत्रं निर्माय व्यवसायाः, विशेषतः लघु-उद्यमाः सशक्ताः अभवन् ।

## प्रधानमन्त्रिणा माओवाद-प्रभावित-क्षेत्रे च चतुर्दिक् विकासं सुनेश्चेतुं महाराष्ट्रप्रशासनस्य प्रयासः प्रशंसितः

प्रधानमन्त्रिणा नरेन्द्र-मोदिना महाराष्ट्रस्य सुदूरक्षेत्रे माओवाद-प्रभावित-क्षेत्रे च चतुर्दिक् विकासं सुनेश्चेतुं राज्यप्रशासनस्य प्रयासः प्रशंसितः। श्रीमोदी अवोचत् यत् एतैः प्रयासैः निश्चितरूपेण जीवनसुगमता एधिष्यते। तीव्रप्रगतेः मार्गश्च प्रशस्तो भविष्यति। अमुना विशेषरूपेण गढ़चिरौली क्षेत्रं निकषा जनाः वर्धापिताः। तत्र गतदिने एकादश नक्सलवादिभिः मुख्यमन्त्रिणः देवेन्द्र फडणवीस इत्यस्य समक्षम् आत्मसमर्पणं कृतम्। श्री फडणवीसः अवोचत् यत् अधिक-सङ्ख्यायां माओवादिनाम् आत्मसमर्पणेन महाराष्ट्रं शीघ्रं नक्सल समस्या मुक्तं भविष्यति। अत्रावसरे मुख्यमन्त्रिणा गढ़चिरौलीजनपदे महाराष्ट्र राज्यपरिवहन निगमस्य द्वात्रिंशत् किलोमीटर-मितस्य मार्गस्य उद्घाटनम् अपि कृतम्।

## प्रधानमन्त्री देहल्यां विविध-विकास-परियोजनानां लोकार्पणं शिलान्यासं च करिष्यति

प्रधानमन्त्री नरेन्द्रमोदी अद्य राजधान्यां नवदिल्ल्यां विविध-विकास-परियोजनानां लोकार्पणं शिलान्यासं च करिष्यति। असौ दिल्ल्याः अशोक विहार-क्षेत्रे सप्तशतोत्तरैक-सहस्रं नवनिर्मित गृहाणाम् उद्घाटनं विधाय पात्रेभ्यः लाभार्थिभ्यः कुञ्जिका प्रदानं करिष्यति। सममेव श्रीमोदी दिल्ली नगरे पुनर्विकास परियोजनानाम् अपि उद्घाटनं करिष्यति।

## भारतेन भूकम्पेन प्रभाविताय वानूआतू देशाय पुनर्वास-पुनर्निर्माणादिनां प्रयासानां कृते पञ्चलक्ष-डॉलर्-मितरूप्यकाणां साहाय्यं प्रेषितम्

भारतेन भूकम्पेन प्रभाविताय वानूआतू देशाय पुनर्वास-पुनर्निर्माणादिनां प्रयासानां कृते पञ्चलक्ष-डॉलर्-मितरूप्यकाणां साहाय्यं प्रेषितम् गतमासे सप्तदशदिनाङ्के दक्षिण-प्रशान्त-महासागरे वानूआतू-देशस्य समीपं सप्त दशमलव चत्वारि तीव्रस्तरीयः भूकम्पः अनुभूतः। यस्मिन् प्रमुखतया जनधनहानिः जाता । भारतेन वानूआतू देशस्य जनान् प्रति गभीराः शोकसंवेदनाः प्रकटिताः।

## बिहारे नवनियुक्तेन राज्यपालेन आरिफ मोहम्मदखानेन शपथं स्वीकृतम्

बिहारे नवनियुक्तेन राज्यपालेन आरिफ मोहम्मदखान इत्यनेन राज्यस्य द्विचत्वारिंशत्तमस्य राज्यपालपदस्य गोपनीयतायाः शपथ-वचनं गृहीतम्। पटना उच्च न्यायालयस्य मुख्यन्यायाधीशः न्यायमूर्तिः के.विनोदचन्द्रनः पटनानगरस्य राजभवने आयोजिते कार्यक्रमे तस्मै शपथग्रहणं कारितवान्।

## सुभाषितम्

**आरोप्यते शिला शैले, यत्नेन महता यथा।
निपात्यते क्षणेनाधस् तथात्मा गुणदोषयोः॥**

हिन्द्यर्थः- शिला को पर्वत के उपर ले जाना कठिन कार्य है परन्तु पर्वत के ऊपर से नीचे धकेलना तो बहुत ही सुलभ है। ऐसे ही मनुष्य को सद्गुणो से युक्त करना कठिन है परन्तु उसे दुर्गुणों से भरना तो सुलभ ही है।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## गणतन्त्रदिवसः-प्रवेशानुमति-पत्राणां विक्रयः आरब्धः



गणतन्त्र-दिवस-प्रयाणाय अथ च बीटिंग रिट्रीट इत्यस्मै टिकट इति प्रवेशानुमति-पत्राणां विक्रयः आरब्धः । रक्षा-मन्त्रालयेन उक्तं यत् प्रवेशानुमति-पत्राणि अद्य सेना-भवन-शास्त्रिभवन-जन्तर-मन्तर-प्रगति-मैदान-राजीव-चौक स्थासनेभ्यः मूल-परिचय-पत्राणि प्रदर्श्य क्रेतुं चेति मेट्रो शक्यन्ते। एतदतिरिच्य aamantran.mod.gov.in इति वेबफलकात् अथ च Aamantran Mobile app इति चलदूरभाषीय-तन्त्रात् अपि प्रवेशानुमति-पत्राणि क्रेतुं शक्यन्ते।

# हिमाचलप्रदेशस्य 'राज्यस्य बालकाः' ('चिल्ड्रन ऑफ द स्टेट' ) त्रयोदश-दिवसीय भ्रमणाय प्रस्थिताः, मुख्यमंत्री सुक्खु उक्तवान् - एषां भ्रमणस्य अधिकारः अस्ति




**हिमसंस्कृतवार्ताः शिमला।** मुख्यमंत्री सुखविन्दरसिंहः सुक्खुः २२ राज्यस्य बालकानां प्रथमं दलं त्रयोदश-दिवसीय भ्रमणाय प्रेषितवान्। मुख्यमंत्री वोल्वो-यानस्य हरित-पताकां प्रक्षिप्तवान् तथा तेषां भ्रमणाय शुभकामनाः प्रदत्तवान्। मुख्यमंत्री उक्तवान् यत् वर्तमानं राज्य-सर्वकारः ६००० अनाथबालकान् विधिना "राज्यस्य बालकाः" इति रूपेण अस्वीकरोत्। तेषां कल्याणाय "मुख्यमंत्री सुख- आश्रय योजना" इति नामकं कार्यक्रमं प्रवर्तितम्, यस्य अन्तर्गतं अनाथबालकानां पालनं, शिक्षायाः प्रदानेन आत्मनिर्भरत्वं च सुनिश्चितं कृतम्। अस्य योजनायाः अन्तर्गतं एते २२ बालकाः चण्डीगढ़ं, दिल्लीं, गोवायां च भ्रमणं करिष्यन्ति। मुख्यमंत्री उक्तवान् यत् भ्रमणाय प्रस्थितेषु २२ बालकेषु १६ कन्याः, ६ बालकाः च सन्ति।

ते २ जनवरीतः ४ जनवरीपर्यन्तं चण्डीगढ़े भ्रमणं कृत्वा चण्डीगढ़े हिमाचलभवने निवासं करिष्यन्ति। ततः ५ जनवरीदिनाङ्के शताब्दी-रेलयानेन दिल्लीं प्रस्थिताः भूत्वा ८ जनवरीपर्यन्तं दिल्लीमध्ये स्थिरं निवासम् करिष्यन्ति

, यत्र ते विभिन्नानि ऐतिहासिकस्थानानि द्रक्ष्यन्ति। ततः ९ जनवरीदिनाङ्के वायुयानस्य साहाय्येन गोवायां प्रस्थिताः भूत्वा १३ जनवरीपर्यन्तं त्रिस्तरीय-आवासगृहेषु निवासं करिष्यन्ति। गोवायां ते पर्यटनं तथा ऐतिहासिकस्थानानां भ्रमणं च करिष्यन्ति। १४ जनवरीदिनाङ्के एते सर्वे बालकाः पुनः वायुयानद्वारा चण्डीगढ़ं प्रत्यागमिष्यन्ति।

मुख्यमंत्री उक्तवान् यत् अनाथबालकानां हिमाचलसंपत्त्यां अधिकारः अस्ति। राज्य-सर्वकारैव तेषां माता च पिता च अस्ति। तेन तस्याः परिवारस्य सदस्यैः सह यथा भ्रमणं कृतं भवति, तथैव एतान् अपि भ्रमणाय प्रेषितं। भ्रमणात् ज्ञानवृद्धिः भवति, यत् भविष्ये बालकेभ्यः उपयोगी भविष्यति। एते बालकाः भविष्ये देशसेवायां महत्त्वपूर्णं योगदानं करिष्यन्ति।

स्वास्थ्य-परिवारकल्याणमन्त्री डॉ. (कर्नल) धनीरामः शांडिलः उक्तवान् यत् राज्यस्य एषः प्रशंसनीयः प्रयासः अस्ति। पूर्वं अनाथबालकानां कोऽपि ध्यानं न दत्तम्, किन्तु अद्य वर्तमानं राज्य-सर्वकारः तेषां परिवारवत् सर्वं आवश्यकं ध्यानं यच्छति।

अस्मिन्नेव अवसरः कृषिमन्त्री प्रोफेसरः चन्द्रकुमारः, उपमुख्यसचेतकः केवलसिंहः पठानिया, विधायकः हरीशः जनार्था, नगरनिगमशिमलायाः महापौरः सुरेन्द्रः चौहानः, मुख्यमंत्रिणः मीडिया परामर्शकः नरेशचौहानः, उपायुक्तः अनुपमः कश्यपः च उपस्थिताः आसन्।

## HP NEWS : 3 फरवरीतः विधायकप्राथमिकता सभाः



हिमसंस्कृतवार्ताः - शिमला। वार्षिकबजट २०२५-२६ मध्ये विधायकानाम् प्राथमिकताः निर्धारयितुं मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः अध्यक्षतायां हिमाचलप्रदेशसचिवालये २०२५ तमस्य वर्षस्य फरवरी-मासस्य ३, ४ दिनाङ्कयोः द्विदिनानां सभायाः आयोजनं भविष्यति। २०२५ तमस्य वर्षस्य फेब्रुवरी-मासस्य ३ दिनाङ्के काङ्गड़ा-किन्नौर-कुल्लू-विधायकैः सह प्रातः १०.३० वादनतः अपराह्न १.३० वादनपर्यन्तं, अपराह्न २ वादनतः अपराह्न ५ वादनपर्यन्तं च सोलन-चम्बा-बिलासपुर-लहौल-स्पीति-मण्डलानां विधायकैः सह सभा भविष्यति । २०२५ तमस्य वर्षस्य फरवरी-मासस्य ४ दिनाङ्के शिमला-मण्डी-मण्डलयोः विधायकैः सह प्रातः १०.३० वादनतः अपराह्न १.३० वादनपर्यन्तं, अपराह्न २ वादनतः अपराह्न ५ वादनपर्यन्तं च ऊना, हमीरपुरं, सिरमौर-मण्डलानां विधायकैः सह सभा भविष्यति।

एतासु सभासु २०२५-२६ तमस्य वर्षस्य वार्षिकबजटस्य विधायिकप्राथमिकतानां निर्धारणाय चर्चा भविष्यति। सभासु २०२५-२६ वर्षस्य मितव्ययतायाः उपायाः, वित्तीयसंसाधनसङ्ग्रहः, उत्तमप्रशासनं च इति विषये विधायकैः प्राप्तानां परामर्शानां विषये अपि चर्चा भविष्यति। राज्यसर्वकारः अपि आगामिवित्तीयवर्षस्य बजटं नूतनस्वरूपानुसारं कर्तुम् इच्छति। इदमपि सम्भवति यत् बजटस्य कुलपरिमाणः अपि गतवर्षात् न्यूनः भवितुम् अर्हति। एतदर्थं सर्वेभ्यः विभागेभ्यः नूतनाः परामर्शाः याचिताः सन्ति। विभागानां समीक्षासभायां मुख्यमन्त्री बजटस्य नूतनान् निर्देशान् अपि ददाति।

## जयरामठाकुरस्य व्यञ्जना, सर्वकारेण निर्वाचनं कृत्वा पुनः जनमतं प्राप्तव्यम्

हिमसंस्कृतवार्ताः - शिमला। विपक्षस्य नेता जयरामठाकुरः उक्तवान् यत् सुखुसर्वकारेण त्यागपत्रं दत्त्वा नूतनं जनमतसंग्रहं करणीयम्। विपक्षनेता जयरामठाकुरः मुख्यमन्त्री सुक्खुः विद्युदनुदानं त्यक्तवान् इति कारणेन महत् वाक्प्रहारं कृतवान्। सः अवदत् यत् ये जनाः ३०० यूनिट् निःशुल्कविद्युत्प्रदानस्य प्रतिज्ञां दत्तवन्तः ते अधुना स्वेच्छया विद्युत् अनुदानं त्यक्तुं आह्वानं कुर्वन्ति। एषः हिमाचलजनेभ्यः विश्वासघातः अस्ति। मिथ्याप्रतिश्रुतिमाश्रित्य काङ्ग्रेससर्वकारः सत्तां प्राप्तवान् । नैतिकतायाः आधारेण सर्वकारः स्वस्य प्रतिज्ञाः पूर्णां कर्तुं न शक्नोति। एतादृशी परिस्थितौ यदि मुख्यमन्त्रिणः साहसं अस्ति तर्हि सः त्यागपत्रं त्यक्त्वा पुनः जनमतं जेतुम् अर्हति। जयरामठाकुरः अवदत् यत् हिमाचले २६ लक्षं विद्युत् उपभोक्तारः सन्ति, येषु १२५ यूनिट् विद्युत् अनुदानं गृही- उपभोक्तृभ्यः भाजपा-सर्वकारस्य समयात् एव दीयते, भवता तदपि स्थगितम्।

**चलचित्रवार्ताः**

## कल्कि २ इत्यस्मिन् चलच्चित्रे महेश बाबू अभिनयं करिष्यति




**हिमसंस्कृतवार्ताः- जगदीशडाभी (मुम्बई)**

प्राप्तवार्तानुसारं कल्कि २८९८ ई. अस्मिन् वर्षे बृहत्तमेषु चलच्चित्रेषु अन्यतमम् अस्ति। नाग अश्विन इत्यनेन निर्देशितं प्रभास अभिनीतं एतत् चलच्चित्रं ब्लॉकबस्टरम् आसीत्। अधुना तस्य उत्तरकथायाः चित्रोतलनम् अतीव शीघ्रमेव आरभ्यते। इदानीं महेशबाबूः कल्कि २ इत्यस्मिन् चलच्चित्रे प्रविष्टः इति वार्ता आगच्छति। महेशबाबूः चलच्चित्रे श्रीकृष्णस्य भूमिकायां दृश्यते। अद्यैव नाग अश्विनः उक्तवान् यत् अहं कल्कि ब्रह्माण्डे भगवन् श्रीकृष्णस्य मुखं प्रकाशयितुम् न इच्छामि। परन्तु यदि अत्र पूर्णदीर्घभूमिका अस्ति तर्हि मम मते महेशबाबूः तदर्थं सर्वथा योग्यः भविष्यति। परन्तु अश्विनः अग्रे अवदत् यत् महेशबाबूः अद्यापि अस्य भूमिकायाः कृते न नियुक्तः।

**संस्कृतगतिविधयः**

## संस्कृतज्ञानां प्रति समाजस्य महती आशा : श्रीमान् जयप्रकाशगौतमः



पञ्जाबीबागस्थले देहल्यां जायमानस्य आवासीयप्रबोधनवर्गस्य द्वितीये दिवसे संस्कृतभारती सङ्घटनस्य अखिलभारतसङ्घटनमन्त्री श्रीमान् जयप्रकाशगौतमः समुपस्थितः। शिक्षार्थिनाम् उद्बोधनकाले महोदयेन उक्तं यत् संस्कृतस्य व्यावहारिकजीवनं प्रति आनेतुं युवानः नेतृत्वं कुर्वन्ति। इतिहासेऽपि प्रत्येकं युगे सर्वाणि परिवर्तनानि युवानः एव कृतवन्तः। महोदयेन उक्तं यत् प्रतिदिनं लक्षशः जनाः जन्म प्राप्नुवन्ति म्रियन्ते च परं यस्य जनस्य कार्येण राष्ट्रं, ग्रामः कुटुम्बादिकं च प्रसिद्धिं प्राप्नोति तस्य जन्म सफलम् । युवजनेषु मेधा ऊर्जा च भवति अतः ते सर्वदैव कार्याणि सम्पादयितुं तत्पराः भवन्ति। ये महापुरुषाः इतिहासे अभवन् तेषां मेधा ऊर्जा च राष्ट्राय हितसाधनदिशा संलग्ना आसीत्।

गौतममहोदयेन कथितं यत् वर्गे संस्कृतमयं वातावरणम् इति विशिष्टः अवसरः। अस्माभिः अस्य अवसरस्य सदुपयोगः करणीयः। प्रबोधनवर्गे 75 शिक्षार्थिनः 25 प्रबन्धकाः 10 शिक्षकाश्च समर्पिततया संस्कृतसाधनायां संलग्नाः सन्ति यत्र अहर्निशं संस्कृतसम्भाषणस्य अभ्यासः आचरणं च भवति ।

# संस्कृतविद्यास्थानानि--३८

## शिक्षाग्रन्थानां वर्ण्यविषयाः-



शिक्षाशास्त्रस्य वर्ण्यविषयाः तैत्तिरीयोपनिषदः भृगुवल्ल्यां एवम् ईरिताः-- अथ शीक्षां व्याख्यास्यामः। वर्णः स्वरः मात्रा बलं साम सन्तानः इत्युक्तः शीक्षाध्यायः।

अ) वर्णाः -- तत्र वर्णाः अकारादिहकारान्ताः। वेदानां ज्ञानाय प्रथमतः वर्णबोधः अत्यावश्यकः। पाणिनीयशिक्षायां वर्णानां सङ्ख्या ६३/६४ वा इति उक्तम्।

**त्रिषष्टिः चतुषष्टिर्वा वर्णाः सम्भवतो मताः।**
**प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा।।**
**स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।**
**यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः।।**
**अनुस्वारो विसर्गश्च ×क×पौ चापि पराश्रितौ।**
**दुःस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव च।।**

एकविंशतिः स्वराः। ककारादारभ्य मकारपर्यन्तं पञ्चविंशतिः स्पर्शव्यञ्जननानि। अष्ट यादयः। चत्वारः यमाः,अनुस्वारः विसर्गः, जिह्वामूलीयः उपध्मानीयः, दुःस्पृष्टः ळकारः, एते त्रषष्टिः वर्णाः। केचन प्लुतं लृकारमपि स्वीकुर्वन्ति इत्यतः चतुःषष्टिः वर्णाः भवन्ति।

आ) मात्रा – स्वरोच्चारणकालः मात्रा। सः च अक्षिपक्ष्मचालनकालः , विद्युद्द्योतनकालः वा। सा मात्रा ह्रस्वदीर्घप्लुतभेदात् त्रिधा। एकमात्रः स्वरः ह्रस्व द्विमात्रः दीर्घः त्रिमात्रः प्लुतः भवति।

एतेषां निसर्गध्वनिना निदर्शनम् एवम्–

**चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः।**
**शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम्।।**

अ इ उ ऋ एतेषां चतुर्णां ह्रस्वदीर्घप्लुतभेदाः भवन्ति। लृकारस्य दीर्घाभावात् केवलं ह्रस्वप्लुतौ। ए ऐ ओ औ एतेषां ह्रस्वाभावात् द्वे द्वे।

इ) स्वराः -- एते ह्रस्वादयः स्वराः उदात्तानुदात्तस्वरितभेदात् पुनः त्रिप्रकाराः भवन्ति। ताल्वाद्युच्चारणस्थानस्य ऊर्ध्वभागे निष्पन्नः स्वरः उदात्तः, अधोभागे निष्पन्नः अनुदात्तः, उभयोः मिश्रणेन जनितः स्वरितः।

उदात्तस्वरस्य दर्शनार्थं विशिष्टचिह्नं नास्ति। अनुदात्तस्य अधः रेखा स्थाप्यते। उदात्तस्य उपरि लम्बरेखा च।

उदात्तादिभ्यः एव सङ्गीते उक्ताः सप्तस्वराः प्रभवन्ति–

**उदात्ते निषादगान्धारावनुदात्त ऋषभधैवतौ।**
**स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः।।**

एतस्य निसर्गे निदर्शनं नारदीयशिक्षायाम् एवमुक्तम्–

**षड्जं वदति मयूरो गावो रम्भन्ति चर्षभम्।**
**अजाविके तु गान्धारं क्रौञ्चो वदति मध्यमम्।।**
**पुष्पसाधारणे काले कोकिलो वक्ति पञ्चमम्।**
**अश्वो धैवतं वक्ति निषादं वक्ति कुञ्जरः।।**

ई) बलम् – बलशब्देन स्थानयत्नौ उक्तौ। वर्णानामुच्चारणकाले यस्मिन् यस्मिन् भागे वायुः सङ्घट्य बहिः निस्सरति तत् उच्चारणस्थानम् इत्युच्यते। आहत्य अष्ट उच्चारणस्थानानि सन्ति–

**अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।**
**जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च।।**

उरः(वक्षः), कण्ठः, शिरः(मूर्धा), जिह्वामूलम्, दन्ताः, नासिका, ओष्ठौ तथा तालु।

वर्णानामुच्चारणार्थं यः गलविवरादीनां सङ्कोचविकासादिरूपः जिह्वास्पर्शनरूपश्च यः प्रयासः सः यत्नशब्देन व्यवह्रियते। सः च आभ्यन्तरः बाह्यश्च एवं द्विविधः। आभ्यन्तरः वर्णोच्चारणात् पूर्वं क्रियमाणः। स्पृष्ट-ईषत्स्पृष्ट-विवृत-ईषद्विवृत-संवृतभेदात् सः पञ्चप्रकारः। वर्णोच्चारणसमये जायमानः बाह्यः। स च संवार-नाद-घोष-विवार-श्वास-अघोष-उदात्त-अनुदात्त-स्वरित-अल्पप्राण-महाप्राणभेदात् एकादशधा।

उ) साम – वर्णानां निर्दुष्टं माधुर्यादिगुणोपेतमुच्चारणं साम इति कथ्यते। पाणिनीयशिक्षायां पठितुः गुणदोषाः विवेचिताः।

**माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।**
**धैर्यं लयसमर्थत्वं षडेते पाठके गुणाः।।**

मधुरोच्चारणम्, अक्षराणां स्पष्टम् उच्चारणम्, पदच्छेदस्य ज्ञानम्, शोभनः स्वरः, धैर्यम्, लयसमर्थत्वं च एते उत्तमस्य पठितुः गुणाः सन्ति।

**गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।**
**अनर्थज्ञोल्पकण्ठश्च षडेते पाठकाधमाः।।**

यः गायनं कुर्वन्निव वेदमन्त्रानुच्चारयति, वेगेन उच्चारणं करोति, पठनसमये शिरः धुनोति, अर्थज्ञानं विना केवलं लिखितस्य पाठं करोति, अर्थं न जानाति , कण्ठस्य सङ्कोचं कृत्वा मन्दस्वरेण उच्चारयति एते षट् अधमाः पाठकाः सन्ति।

वर्णानाम् उच्चारणं कथं भवेत् इति कथयन् प्रसिद्धः पाणिनियशिक्षाश्लोकोयम्–

**व्याघ्री यथा हरेत्पुत्रान् दंष्ट्राभ्यां नैव पीडयेत्।**
**भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत्।।**

व्याघ्री यदा स्वस्य शावकान् दंष्ट्राभ्यां उन्नीय नयति तदा शावकानां पतनं भूत्वा ते क्षतं न प्राप्नुयुः तथैव स्वस्य दंष्ट्राभ्यां वेधनं भूत्वा ते न म्रियेरन् इत्यपि सा अवदधाति एवं सावधानतया वर्णाः प्रयोक्तव्याः।

ऊ) सन्तानः -- सन्तानशब्देन संहिता उच्यते। वर्णानाम् अर्धमात्राव्यवधानेनापि रहितः अतिशयितः सन्निधिः संहिता। निरुक्ते तु 'पदप्रकृतिः संहिता' इति उक्तम्। सा च संहिता सन्धीनां जननी। वेदमन्त्राणां पाठसमये पदच्छेदस्य ज्ञानं तथैव सन्धिज्ञानमपि आवश्यकम् यतः मन्त्रपाठः ससन्धिकः तथैव पदविभागं कृत्वापि भवति। यथा 'वायो आयाहि' एतयोः पदयोः क्रमिकोच्चारणे 'वायवायाहि' एवं सन्धिः भवति। 'इन्द्राग्नी आगतम्' इत्यत्र इन्द्राग्नीपदस्य प्रगृह्यत्वात् उभेपि पदे सन्धिं विना प्रकृतिभावेन तिष्ठतः।

**प्रमुखाः शिक्षाग्रन्थाः --**

प्रमुखाः शिक्षाग्रन्थाः तत्तत्प्रवर्तकस्य ऋषेः नाम्नैव बहुधा ज्ञायन्ते। ऋग्वेदीयशिक्षासु शौनकीयशिक्षा, शैशिरीशिक्षा च इति द्वे शिक्षे स्तः। शुक्लयजुर्वेदस्य याज्ञवल्क्यशिक्षा, वासिष्ठी शिक्षा, कात्यायनीया शिक्षा,पाराशरी शिक्षा, अमोघनन्दिनी शिक्षा,माण्डवी शिक्षा इत्याद्याः बह्व्यः शिक्षाः उपलब्धाः। कृष्णयजुर्वेदस्य तैत्तिरीयशाखासम्बद्धाः भारद्वाजशिक्षा, व्यासशिक्षा, हारितशिक्षा इत्यादयः शिक्षाग्रन्थाः सन्ति। सामवेदसम्बद्धाः नारदीयशिक्षा, गौतमी शिक्षा, लोमशी शिक्षा च सन्ति। अथर्ववेदस्य एका एव माण्डूकी शिक्षा प्राप्यते।

पाणिनीयशिक्षा – शिक्षाग्रन्थेषु एषः अत्यन्तं महत्त्वपूर्णः ग्रन्थः वर्तते। एतस्मिन् ६० श्लोकाः सन्ति। मूलतः पाणिनिना प्रोक्ता शिक्षा सूत्ररूपा आसीत् इति विदुषां मतम्। अनन्तरं केनचित् पाणिनीयेन तत्सम्प्रदायानुसारम् एषा श्लोकबद्धा शिक्षा रचिता अस्ति। लौकिकवैदिकशास्त्राणाम् अध्ययनाय एषा अत्यन्तम् उपादेया। एषा ऋग्वेदसम्बन्धिनी अस्ति इति मन्यते।

------ श्री अभिजित् तोडकर
9145908156

# हास्यकणिका




### "कुछ भी अथवा किमपि" शब्दयोः प्रयोगः भार्यायाः सम्मुखे पूर्णरूपेन - मास्तु

हास्यकणिका विशेषज्ञा - विदुषी अग्रवाल
प्रेरणास्त्रोत्रः - महाभागः श्री महेन्द्रमिश्र महोदयः

संध्याकाले गृहे एकः कार्यक्रमः भविष्यति, अतः पत्नी पतिं पृष्टवति - "अद्य संध्याकालस्य भोजने किं एषिष्यति?"

पतिः - कुछ भी (किमपि)।

पत्नी बालकान् अपि पृष्टवति - "अद्य संध्याकालकार्यक्रमस्य भोजने किं खदितुम् एषिष्यन्ती?"

बालकान् अपि - कुछ भी (किमपि)।

दुःखिता भूत्वा पत्नी चिन्तित्वति - किं करोमि 🙄

एकः विचारः आगतवान् 💡 😃

पत्नी द्वयोः प्रकारयोः भोजनं सज्जां कृतवती। 😃

भोजनं दृष्ट्वा पतिः , बालकाः सर्वे आगन्तुकाः च विस्मिताः भवन्ति। पृष्टवन्तः - एतानि किम्?

पत्नी उत्साहेन उक्तवती-

"कुछ भी" इत्युक्ते

कु – कारवेल्लम् छ - छत्र (मशरूम)
भी – भिंडिका "किमपि" इत्युक्ते
कि – कारवेल्लम् म - मृद्वीका (द्राक्ष)
पि - पिष्टिकम् (biscuit)

**सर्वे जनाः** 🙄 😲 😠 🤯

अन्याः सर्वाः भार्याः अपि उक्तवत्यः, यदि वयं पतयः बालकाः च अपि "कुछ भी अथवा किमपि" शब्दस्य प्रयोगः करिष्यन्ति, तर्हि वयं अपि सादृशा भोजनं सज्जां करिष्यामः 😃 😂

अतः कदापि "कुछ भी अथवा किमपि" शब्दस्य प्रयोगः भार्यायाः सम्मुखे - मास्तु 😃

### " लौकिकन्यायकोशः " ( १३० )

### " मृद् घटन्यायः "

मृदा निर्मितः घटः अनायासेन भेत्तुं शक्यः योजयितुं च अशक्यः ।एवं दुर्जनैः कृता मैत्री सुखेन भेत्तुं शक्या सन्धातुं च अशक्या।

सुजनैः च कृता मैत्री कनकघट इव भेत्तुम् अशक्या भिन्ना च पुनः सन्धातुं सुशक्ता इति भावः ।

मृद्घट इव सुखभेद्यो दुःसन्धानश्च दुर्जनो भवति
सुजनस्तु कनकघट इव दुर्भेदः सुकरसन्धिश्च
।। ( पञ्चतन्त्रे २- ३८ )

डा. वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्

# Mukesh Agnihotri : ठियोग- जलापूर्ति-घटनायाः अन्वेषणं क्रियते, उपमुख्यमंत्रिणा मुकेशअग्निहोत्रिणा विभागीय-सचिवाय निर्देशः दत्तः



हिमसंस्कृतवार्ताः- शिमला। उपमुख्यमन्त्री मुकेश अग्निहोत्री शिमलामण्डलस्य ठियोगस्य जलापूर्तिनाम्ना जलशक्तिविभागे वञ्चनकृत्यस्य आरोपस्य अन्वेषणस्य आदेशं दत्तवान्। सः विभागस्य अतिरिक्तमुख्यसचिवं ओंकरशर्मणे एतस्य सम्पूर्णस्य विषयस्य अन्वेषणं कर्तुं आह। उपमुख्यमन्त्री उक्तवान् यत् जलशक्तिविभागस्य त्रयः अपि विभागाः अन्वेषणस्य क्रमे सन्ति यतः एतादृशानां अनियमितानां विषये सूचनाः आगच्छन्ति। उपमुख्यमन्त्री उक्तवान् यत् ठियोगे कृतानां आरोपानाम् अधः यावत् अन्वेषणं भविष्यति। यदि कश्चित् अनियमितः लभ्यते तर्हि कोऽपि न मुक्तः भविष्यति। उल्लेखनीयं यत् ठियोग-प्रकरणस्य विषये सूचना आरटीआइ-माध्यमेन प्रकाशं प्राप्ता। तदनन्तरं प्रथमं ठियोगस्य विधायकः कुलदीपसिंहराठौरः ततः पूर्वविधायकः राकेशसिन्हा मुख्यसचिवं मिलित्वा अन्वेषणस्य आग्रहं कृतवन्तौ। अत्र जलापूर्ति-नाम्ना कोटिरूप्यकाणां भ्रष्टाचारस्य जलशक्तिविभागे आरोपः कृतः अस्ति।ठियोगतः पूर्वमाकपा विधायकः राकेशसिंघा अवदत् यत् ठियोगस्य जनानां कृते एककोटि-१३ लक्षरूप्यकाणां जलं प्रदातुं विश्वासः कृतः, एतत् जलं बाईक्, आल्टो-कार, होण्डा-सिटी-कार, उद्याननिदेशकस्य बोलेरो इत्यादिभिः वाहनैः परिवहनं कृतम् । सिंघामहोदयः अवदत् यत् जलशक्तिविभागेन अपि द्विचक्रिकया जनानां कृते जलं प्रदत्तम् अस्ति। यदा संविदाकारः बिलसङ्ग्रहार्थं देयकानि उत्पादितवान् तदा उद्याननिदेशकस्य बाईक्, आल्टोकारः, होण्डा सिटीकारः, बोलेरो इत्यादीनां वाहनानां संख्याः दत्ताः सः अवदत् यत् एकं वाहनम् एकस्मिन् दिने ५०० तः १००० किलोमीटर् यावत् धावति इति दर्शितम् अस्ति, यत् पर्वतेषु सम्भवं नास्ति।

# देशस्य उत्तर-क्षेत्रे सघन-कुज्झटिकया रेलयानानां विलम्बः



देशस्य उत्तर-क्षेत्रे सघन-कुज्झटिकया दृश्यतायां न्यूनता दृश्यते। अनेन कारणेन नैकानि रेलयानानि प्रभावितानि। भारतीय-रेल-विभागानुसारं दिल्ली-नगरं प्रत्यागम्यमानानि त्रिचत्वारिंशत् यावत् रेलयानानि पञ्चहोरापर्यन्तं विलम्बेन प्रचलन्ति । तेषु पद्मावत एक्स्प्रेस्, कालिन्दी एक्स्प्रेस्, श्रमशक्ति एक्स्प्रेस्, महाबोधी एक्स्प्रेस्, आश्रम एक्स्प्रेस्, विक्रमशिला एक्स्प्रेस्, कैफियात् एक्स्प्रेस् इत्येतानि रेलयानानि सन्ति । विभागेन यात्रिभिः निवेदितं यत् ते यात्रायाः प्राक् रेलयानानां स्थितिम् अवश्यम् अवलोकयन्तु ।

# भारतीय जनता पार्टी इति दलेन राष्ट्रिय-राजधानी-क्षेत्रे मार्गाणाम् आधारभूत संरचनायाः च विकासं प्रति निज-प्रतिबद्धता पुनः प्रकटिता



भारतीय जनता पार्टी इति दलेन केन्द्र-प्रशासनेन आरब्ध परियोजना-विषये राष्ट्रिय-राजधानी-क्षेत्रे मार्गाणाम् आधारभूत संरचनायाः च विकासं प्रति निज-प्रतिबद्धता पुनः प्रकटिता। नव-दिल्ल्यां वार्ताहरान् सम्बोधयन् वरिष्ठ नेता केन्द्रीय मन्त्री च हर्ष-मल्होत्रा अवोचत् यत् तेन सेन्ट्रल-विस्ता इति भवनं मैट्रो मार्गेण सह संयोजयितुं केन्द्र-प्रशासनं निवेदतम्। अनेन जनानां यात्रा सुखदा भविष्यति। भाजपेति दलस्य नेता मनोज तिवारी अपि आम आदमी पार्टी दलम् अधिक्षिपत् यत् आप दलेन राष्ट्रिय-राजधान्यां विकास-गतिः न्यूनतां याता।

# सम्भलस्य जामामस्जिद् स्थले मन्दिरस्य साक्ष्याणि प्राप्तानि



सम्भलस्य शाहीजामामस्जिदस्य अन्तः अधिवक्ता आयोगस्य प्रतिवेदनं न्यायालये पिहिते पुटके प्रस्तुतम् अस्ति। अस्य सर्वेक्षणप्रतिवेदनस्य आन्तरिकविवरणं प्रकाशं प्राप्तम् अस्ति । जामामस्जिदे मन्दिरस्य अस्तित्वस्य प्रमाणानि प्राप्तानि इति कथ्यते । मस्जिदस्य अन्तः द्वौ वटवृक्षौ स्तः । सामान्यतया वटवृक्षः केवलं हिन्दुधर्मस्य मन्दिरेषु एव पूज्यते । एतत् एव न, मस्जिदे एकः कूपः अपि अस्ति, यः अर्धः अन्तः, अर्धः बहिः च अस्ति । बहिः भागः आच्छादितः अस्ति। मस्जिदस्य अन्तः उत्कीर्णानि कमलपुष्पाणि अपि प्राप्तानि सन्ति । आवाम् वदामः यत् सम्भलस्य जामामस्जिदस्य अन्तः कृतस्य सर्वेक्षणस्य अधिवक्ता आयोगस्य प्रतिवेदनं सिविलन्यायाधीशस्य वरिष्ठप्रभागस्य आदित्यसिंहस्य न्यायालये प्रस्तुतम् अस्ति। अधिवक्ता आयुक्तः रमेशराघवः न्यायालये एतत् प्रतिवेदनं प्रस्तुतवान् अस्ति। सूत्रानुसारम् अस्मिन् सर्वेक्षणप्रतिवेदने शाहीजामामस्जिदस्य मन्दिरस्य अस्तित्वस्य बहु प्रमाणं प्राप्तम् अस्ति । जामामस्जिदस्य सर्वेक्षणस्य प्रथमदिने अर्थात् २०२४ तमस्य वर्षस्य नवम्बर्-मासस्य १९ दिनाङ्के प्रायः सार्धघण्टायाः वीडियोग्राफी कृता, द्वितीयदिने तु प्रायः त्रयः घण्टाः वीडियोग्राफी कृता अस्मिन् काले प्रायः १२०० छायाचित्राणि गृहीताः । सर्वाणि वस्तूनि निरीक्ष्य मस्जिदस्य अन्तः ५० तः अधिकाः पुष्पमुद्राः/कलाकृतयः प्राप्ताः । तस्मिन् एव काले गुम्बजस्य भागः साधारणः कृतः अस्ति ।पुरातनसंरचनायाः प्रतिस्थापनस्य प्रमाणानि अपि प्राप्तानि, तथैव तस्मिन् स्थले नूतननिर्माणस्य प्रमाणानि अपि प्राप्तानि । मन्दिरस्य आकारयुक्तं संरचना प्लास्टरं कृत्वा चित्रितं च अस्ति । मस्जिदस्य अन्तः यत्र महती गुम्बदः अस्ति, तत्र तारेन बद्धशृङ्खलायाः सह दीपकं लम्बितम् अस्ति ।

# ८२८ मेगावाट् प्रत्येकं २२ नवीनजलविद्युत्परियोजनानां आवंटनं कर्तुं गच्छति हिमाचलराज्यसर्वकारः



हिमसंस्कृतवार्ताः -शिमला । मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् राज्यसर्वकारः २२ नवीनजलविद्युत्परियोजनानां आवंटनं कर्तुं गच्छति, येषां कुलविद्युत्क्षमता ८२८ मेगावाट् अस्ति। सः अवदत् यत् एतासु परियोजनासु ६.५ मेगावाट् तः ४०० मेगावाट् यावत् परियोजनाः सन्ति। सः अवदत् यत् राज्यस्य कुल्लु, चम्बा, किन्नौरम्, लाहौल-स्पीतिः, शिमला जनपदेषु च एताः परियोजनाः चिह्निताः सन्ति, येषु अधिकतमं ५९५ मेगावाट् क्षमतायाः नव परियोजनाः चिनाव नदीबेसिने सन्ति, १६९ मेगावाट् क्षमतायाः अष्ट परियोजनाः सतलुजनद्यां सन्ति, ५५ मेगावाट् रावीनद्यां क्षमतायाः चतस्रः परियोजनाः नवमेगावाटक्षमतायाः एका परियोजना ब्यासनद्यां च स्थापयितुं च प्रस्ताविता अस्ति। सुखविन्दरसिंहसुक्खुः इत्यनेन उक्तं यत् प्रथमवारं राज्यसर्वकारेण एताः परियोजनाः देशस्य अन्यराज्येभ्यः केन्द्रशासितक्षेत्रेभ्यः च अन्येभ्यः राज्येभ्यः केन्द्रीयेभ्यः उपक्रमेभ्यः च ४० वर्षेभ्यः प्रति मेगावाट् १० लक्षरूप्यकाणां अग्रिमप्रीमियमस्य आधारेण आवंटनस्य निर्णयः कृतः। सः अवदत् यत् अस्मिन् विषये ऊर्जानिदेशालयेन सर्वेभ्यः राज्यसचिवेभ्यः केन्द्रीय उपक्रमेभ्यः च पत्रमपि प्रेषितम् अस्ति। एतासां परियोजनानां आवंटनार्थं अधिकतमप्रचारार्थं विज्ञापनमपि निर्गच्छति इति सः अवदत्। मुख्यमन्त्री उक्तवान् यत् एतासां परियोजनानां कार्यान्वयनेन विद्युत् आपूर्तिः सुनिश्चिता भविष्यति, निःशुल्कविद्युत्रूपेण राजस्वस्य वृद्धिः भविष्यति, स्थानीयजनानाम् रोजगारः, स्थानीयक्षेत्राणां विकासः च भविष्यति। हिमाचलप्रदेशः देशस्य समृद्धतमराज्येषु अन्यतमः इति रूपेण उद्भवति।

# पञ्जाब-हरियाणा-चण्डीगढ़-दिल्ली अथ च उत्तर-प्रदेशस्य कतिपय-भागेषुप्रबल-कुच्छटिका-प्रभावः – ऋतुविज्ञानविभागः

ऋतुविज्ञानविभागेन पञ्जाब-हरियाणा-चण्डीगढ़-दिल्ली अथ च उत्तर-प्रदेशस्य कतिपय-भागेषु मध्य रात्रौ प्रभाते च प्रबल-कुच्छटिका-प्रभावः अनुमानितः। सममेव पश्चिम-बङ्गाले हिमाचल-प्रदेश-राजस्थान-मध्य-प्रदेश-छत्तीसगढ़-हिमालयोपत्यकायुते पूर्वोत्तर-राज्येषु च श्वः यावत् समान-स्थितेः सम्भावना विद्यते। वैज्ञानिकः सोमा-सेन-रॉयः अवोचत् यत् जम्मूकश्मीर-हिमाचल-प्रदेशयोः सप्ताहान्तं यावत् प्रबलवृष्टेः हिमपातस्य प्रचण्डवातेश्च सम्भावना वर्तते।

# नेपालस्य महत्त्वपूर्णेषु तीर्थस्थलेषु
# एकं पुण्यक्षेत्रमस्ति देवघाटः



हिमसंस्कृतवार्ताः-शिवराजभट्टः ,नेपालः

देवघट्टः देवघाट वा क्षेत्रं नेपालदेशस्य महत्त्वपूर्णेषु तीर्थस्थलेषु एकमस्ति। अस्य क्षेत्रस्य महत्त्वं वैदिककालतः पुराणेषु व्याख्यातमस्ति। पुराकाले धार्मिकमहत्त्वस्य दृष्ट्या देवघट्टः महत्वपूर्णधार्मिकः स्थलं मन्यते, परन्तु अधुना स्वच्छनद्यौसंगमस्थलं परितः सुन्दराणि अरण्यानि विद्यमानानि सन्ति। जैविकविविधता भिन्न-भिन्न-जनजातयः,भिन्न-भिन्न-कालेषु निर्मिताः सुन्दरमूर्तयः मठानि, मन्दिराणि, विविधाः तपस्विनः, भक्ताः आध्यात्मिकजनाः पर्यटनसंस्कृतिं ऐतिहासिकपुरातत्त्वदृष्ट्या महत्वं ददति। धार्मिकाध्यात्मिकदृष्टयापि स्थलमिदं महत्त्वपूर्णमस्ति। देवघट्टक्षेत्रं न केवलं प्राचीनऋषीणां, तपस्विनाम् आध्यात्मिकभक्तानाम् अपि तु विदुषां शोधकर्तॄणां, प्रकृतिप्रेमिणां, संस्कृतिविशेषज्ञानां, पर्यावरणविदानां, तीर्थयात्रिकाणां, पर्यटकानां, आधुनिकविज्ञाने रुचिः विद्यमानानां पर्यटनव्यावसायिकाणां च कृते अपि महत्त्वपूर्णम् अस्ति इति मन्यते। देवघट्टधामः आदिप्रयागः नेपालस्य तनहुमण्डलस्य, नवलपरासीमण्डलस्य, चितवनमण्डलस्य च संगमस्थाने अस्ति। महापुण्यप्रदा अतीव पवित्रगङ्गा गण्डकीनदी दामोदरकुण्डतः उद्भुत्वा पवित्रमुक्तिनाथक्षेत्रात् प्रवहन्नस्मिन् क्षेत्रे आगच्छति। एवं प्रकारेण महापुण्या गङ्गात्रिशुली नदी अपि प्रवित्र पुण्यक्षेत्रं गोसाईकुण्डतः उद्भुत्वा अत्रागच्छति। द्वे गङ्गे अत्र देवघट्टे पुण्यक्षेत्रे संगमतः। विश्वस्य दुर्लभवस्तु शालिग्रामशिला अप्यत्र कालिगण्डकीतटे प्राप्ता भवति इति कारणेन अस्य स्थानस्य महत्त्वं वर्धितम् इति विश्वासः अस्ति। माघे संक्रान्त्यां, हरिशयनीएकादश्यां, हरिबोधनीएकादश्यां, श्रावणमासे बोलवमे, बालाचतुर्दशी, ग्रहणकाले, वैशाखसंक्रान्तौ, इत्यादिषु बहुषु पर्वषु देशदेशतः सनातनधार्मिकभक्तजनाः अस्मिन् पुण्यक्षेत्रे दर्शनार्थं स्नानार्थं, दानपुण्यार्थञ्च आगच्छन्ति। महद्पुण्यपर्वषु चात्र मेलापकाः उत्सवाः अपि भवन्ति। सीतागुहा, चक्रवर्तीमहादेवमन्दिरं, महेशआश्रमः, गलेश्वरधामः, हरिहरआश्रमः, लक्ष्मीनारायणमन्दिरं, बागेश्वरीमन्दिरं, योगीनरहरिनाथस्य गोसंरक्षणकेन्द्रं, गणेशस्थानं, हरिहरमन्दिरं, मौलकाली मन्दिरं इत्यादयः प्रसिद्धाः देवालयाः सन्ति। येन सैंहींतनुं बिभ्रता हिरण्यकशिपुं प्रतिचस्करं तस्य नृसिंहरुपस्य प्रतिमा, यः जानकीमपहारिं हत्वा विभिषणाय लङ्कापुरीं राज्यं ददौ तस्य रामस्य सीतलक्ष्मणाभ्याम् विशालमूर्तिः, भारभंगसुरां पृथिवीं लघुकरिष्यन् कंसादिदुष्टान् उज्जयितुं यः वैकुण्ठादवतरतः कृष्णस्य मूर्तिः इत्यादीनि दर्शनीयस्थानानि सन्ति।

वराहपुराणे, स्कन्दपुराणे देवघट्टं महात्म्यं वर्णनमस्ति। वराहपुराणे देवघाटे देवताः प्रातःकालं स्नानं कर्तुम् आगच्छन्ति, तस्मात् एतत् क्षेत्रं देवस्य घट्टः देवघट्टः इति उपदिष्टम् अस्ति। देशस्य विभिन्नक्षेत्रेभ्यः मुमुक्षुजनाः जीवनस्य उत्तरार्धे देवघाटम् आगत्य कल्पवासं कृत्वा शेषं जीवनं निर्वसन्ति। पुरा पाल्पा राज्यस्य प्रसिद्धः तपस्वी राजा श्रीमत् मणिकुन्दसेनः अन्तकाले स्वराज्यं त्यक्त्वा मुमुक्षु भगवत् प्राप्त्यर्थं तपस्यार्थमत्र आगतः। योगी नरहरीनाथेन बहूनि बर्षाणि पर्यन्तमस्मिन् क्षेत्रे तताप।



एवं प्रकारेण गलेश्वरः बाबा इति नाम्नः केनचित् प्रख्यातेन सन्यासिना इच्छानुसारं, दृढनिश्चयानुसारं च देवघट्टे वेदवेदाङ्ग- विद्यालयः, यज्ञशाला, धर्मशाला, मन्दिरं, आश्रममित्यादीनि अपि स्थापितानि सन्ति। पुराकाले सः अस्मिन् स्थाने सदा रामायणं गीता मनुस्मृतिः इत्यादयः पपाठ। २०५०बिक्रमाब्दे तमे वर्षे डॉ. स्वामी रामानन्दगिरी इत्यनेन वैदिक सनातनधर्मसंस्कृतिरक्षणार्थं प्रचाराय च आश्रमस्य स्थापना चकार। एकसहस्रभक्तानां वासार्थं निर्मितः हरिहरसन्यासाश्रमः नाम्ना प्रसिद्धः अस्ति। अयं आश्रमः संस्कृतविश्वविद्यालयात् स्नातकोत्तरस्तरपर्यन्तं संस्कृतविषयान् पाठयितुं अनुज्ञां प्राप्तमस्ति। प्राचीनगुरुकुलस्य स्मरणं जनयन्तः बहवः छात्राः दीक्षिताः सन्ति। देवघाटस्य गलेश्वराश्रमस्य पश्चिमेदिशि कालिगण्डकीतटे महिर्षिवशिष्ठस्य मूर्तिः अस्ति। अयोध्याराज्ञः रामचन्द्रस्य गुरुः महर्षिवशिष्ठः प्राचीनकाले अस्मिन् स्थाने बहुकालपर्यन्तं तताप इति आख्यानमस्ति। अत्र तस्याधोभागेः सीता गुहा अस्ति। रामस्य वनगमनकाले यदा सीता निगूढरुपेण आसीत् रावणः छायारुपिणि सीतां जहार तस्मिन् काले अपि सीता अस्यां गुहायां निगूढा आसीत्। पश्चात् प्रयाणकालेऽपि अस्यां गुहायां सीता रामं त्यक्त्वा पृथिव्यां निलायायञ्चक्रे जनाः इति विश्वास कुर्वन्ति। ऐतिहासिकं चक्रेश्वरमन्दिरं गलेश्वराश्रमसङ्कुलस्य पूर्वदिशि उच्चस्थाने स्थितम् अस्ति। अत्र विशाला वृत्तशिला स्थापिता अस्ति। पाल्पास्य राज्ञः मुकुन्दसेनः अत्र आगत्य तताप। एकदा स्नानार्थं गच्छन् सः एकां वृत्तशिलाम् दृष्ट्वा अत्र आनयत्, अतः तस्य नाम्ना मुकुन्देश्वरमन्दिरम् बभूव। मन्दिरं परितः चतुर्षु स्थानेषु मन्दिराणां भग्नावशेषाः सन्ति। अत्र सूर्य- भैरव- गणेश- कालिकामन्दिराणि सन्ति। केदारनाथमन्दिरं झूलनसेतोः पूर्वदिशि स्थितम् अस्ति। चक्रवर्ती मन्दिरस्य समीपे स्थिते मन्दिरे शिलायां लक्ष्मीनारायणस्य पादचिह्नं प्राकृतिकं रूपेण अस्ति। एषा शिला अलौकिकं च रहस्यमयी चास्ति, इति स्थानीयजनानां विश्वासः अस्ति। देवघाट-नारायणगढयोः मध्यमार्गे वने ऐतिहासिकं बागेश्वरीमन्दिरम् अस्ति। तत्र नारायणीनद्यां सम्मुखे व्याघ्रद्वयस्य कलात्मकं शिल्पं वर्तते। अन्ये पाषाणशिल्पाः भग्नावशेषरूपेण सन्ति। अस्याः प्रतिमायाः अध्ययनं कुर्वन्तः शोधकर्तारः अस्य प्रतिमायाः पञ्चदशशताब्द्याः परितः इति अवदन्। झूलनासेतुतः पूर्वदिशि भगवतः बद्रीनाथस्य विशालं मन्दिरम् अस्ति।

# धारावाहिकं
# गीताप्रश्नोत्तरम्- १८



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

अर्जुनः- भगवन्! एवं त्रिधा भेदाः इतरेषां केषां केषां भवन्ति?

श्रीकृष्णः- पृथिव्यां स्वर्गे देवेषु च एतान् विना अन्यत्र कुत्रापि एतादृशं वस्तु नास्ति, यत् प्रकृतिजन्यैः त्रिभिर्गुणैः रहितं स्यात्, अर्थात् समस्ता त्रिलोकी एव त्रिगुणात्मिका वर्तते।

अर्जुनः- एतेभ्यः गुणेभ्यः विमुक्तिं लब्धुं शक्यते वा? तदर्थं कोऽपि उपायः अस्ति किं भगवन्?

श्रीकृष्णः- हे पार्थ! पश्य, संसारेऽस्मिन् ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रः चेति चतुर्वर्णानां विभागः मनुष्याणां स्वभावप्रभवैः गुणैः क्रियते। अतः यदि स्ववर्णानुकूलं नियतं कर्म क्रियते, तर्हि तदेव गुणेभ्यः विमोक्षणस्य उपायः भवति।

अर्जुनः- तर्हि, ब्राह्मणस्य कृते नियतकर्माणि कानि भगवन्?

अर्जुनः- शृणु, पार्थ! मनोनिग्रहः, इन्द्रियाणां वशीकरणं, धर्मपालनावसरे दुःखक्लेशादिसहनं, बाह्याभ्यन्तरयोः शुद्धिः, क्षमाभावः, व्यवहारे सरलता, वेदादिशास्त्राणां परिशीलनम्, तत्त्वानुभवः, आस्तिकता इत्यादीनि ब्राह्मणस्य स्वभावजानि कर्माणि उच्यन्ते।

अर्जुनः- क्षत्रियस्य चेत् कानि कर्माणि स्युः केशव?

श्रीकृष्णः- शूरवीरता, तेजः, धैर्यं, चातुर्यम्, युद्धावसरे अपलायनं, दानम्, शासनम् चेति एतानि क्षात्रकर्माणि सन्ति, अर्थात् क्षत्रियाणां कृते इमानि स्वभावजानि कर्माणि सन्ति।

अर्जुनः- वैश्यस्य कर्माणि चेत् कानि भगवन् ?

श्रीकृष्णः- अर्जुन! कृषेः सम्पादनं, गोरक्षा, न्याययुक्तः व्यापारः चेति वैश्यकर्माणि स्वभावजानि कथ्यन्ते।

अर्जुनः- एवं शूद्रस्य कर्माणि चेत् भगवन्?

श्रीकृष्णः- लोकसेवा, अर्थात् सर्वेषां हिताय साहाय्यप्रदानं शूद्रस्य स्वभावजं कर्म इति विद्धि कुन्तीपुत्र इति। (गी०-१८/४०-४४) **(अनुवर्तिष्यते)**

✍हिमसंस्कृतवार्ताः, डॉ.विवेकः, जोगिन्दरनगरम्

## सामान्यज्ञाननम्

प्रश्नः 1. भारते भाखड़ा - जलबन्धः कुत्र अस्ति?

उत्तरम् : सतलुज - नद्याम् भाखड़ाग्रामे बिलासपुरजनपदे (हिमाचल प्रदेशे)

प्रश्नः 2. 'अभिनवभारती' इत्यस्य रचयिता कः अस्ति?

उत्तरम् - 'अभिनवगुप्तः'।

प्रश्नः 3. 'अक्ष्णोः प्रति' इत्यस्य समस्त पदं किम्?

उत्तरम्- प्रत्यक्षम्। (अव्ययीभावः)

प्रश्नः 4. 'देवेन्द्रः' इत्यस्य सन्धि- विच्छेदं कुरुत-

उत्तरम्- 'देव + इन्द्रः'।

प्रश्नः 5. विधानसभायाः सदस्यः भवितुम् न्यूनतमः आयुः कियद् अस्ति?

उत्तरम्- विधानसभासदस्यः भवितुम् न्यूनतमः आयुः पञ्चविंशतिवर्षीयः अस्ति।